।। श्रीहरिः ।।

भैष्मीपरिणयचम्पूः

चतुरधिकशत-निबन्ध-निर्मातृ-श्रीरत्नखेटदीक्षित-कृता

।। श्रीहरिः ।।

संस्कृतोत्सव - शृङ्खलान्तर्गता प्रकाशिता

भैष्मीपरिणयचम्पूः

चतुरधिकशत-निबन्ध-निर्मातृ-श्रीरत्नखेटदीक्षित-कृता

चित्रपरिचयः

भगवान् श्रीद्वारकानाथः

(प्रसिद्धकर्त्री :- मनुभाई गिरिधरलाल आणि कंपनी, द्वारका)

बृहन्मन्दिरस्थ - पूर्वाचार्याणां प्राकारस्थं चित्रम् ।

✻ *प्रकाशकम्* ✻

श्रीगोवर्धनेश-प्रकाशन-मण्डलम्

(मुम्बापुरी)

प्रथम-संस्करणम् : श्रीवल्लभाब्दः ५३६ - वि. सं. २०७० - 2014 C.E.
निःशुल्कवितरणार्थम्

सम्पादकः
श्रीचरणाज्ञाङ्कितः गोस्वामी गोकुलनाथः

संशोद्धा
डॉ. गिरिशः जानी

Bhaiṣmī-pariṇaya-campūḥ composed by Shri Ratnakheta Deekshita. The Edition of this work in advanced Sanskrit is prepared on the basis of two manuscripts, one belonging to H. H. Goswami Shri Gokulnathji Maharaj, Mota Mandir Sansthan and the other belonging to Pandit Shri Gattulalaji Research Centre - Mumbai (India). The present Celebrating Samskrutam Series is our effort to present various genres of creative writing in Sanskrit. This series is dedicated to Kalanidhi H. H. Goswami Shri Gopinathji Maharaj.

To download Bhaishmi Parinaya Champu (Pdf) kindly visit
www.vallabhacharyakrupa.org

पत्रप्रेषणसङ्केतः :

Shri Govardhanesh Prakashan Mandal

Administrator : Shri Bipinbhai Shah
Shop No. 40, 1st Bhoiwada,
H. H. Shri Gokulnathji Maharaj Lane,
Mumbai - 400 002.

मुद्रक :

Pratha Prints

Nathalal Bhuvan, 3rd Floor,
133, V. P. Road, Mumbai - 400 004.
Ph. : 09167339603
email : ccgnik@gmail.com



एकस्याः मातृकायाः आद्यं पत्रम्

Mota Mandir Collection (Mumbai)
(dated Shaka Era 1783)

नेमी०
१

॥श्रीगणेशायनमः॥ यस्योपवीतगुणएवफणावृतैकवक्षोरुहः कुचपटीयतिवामनागे तस्मैमम
स्तुतमसामवसानसीम्नेवंशार्धमौलित्रिरसेमहसेनमस्या १ अजितगमनानार्योराजन्मनोजनितां
तेनाः सुरतिसहस्रास्ताः सन्मुख्यानवानपितनुभुवे वनचुंबिमितोगेहादेकोनगच्छ भ्रमांविनेससख
ष्टदितः शत्रुः पित्राजयत्यनघोदरिः २ अमरहितासाक्षवत्कुचवत्स्त्रीणांतुसरसहितशोना जस
दस्तरपीयूषाऽधरवल्कवितामहात्मनांजीयात् ३ धन्यधन्याधिकंचमत्कृतियुता यस्याद्भुतासूक्ता
यः सारस्येनसुधांसुधांविदधतेतांशर्करांशर्करां साविश्याः प्रथमंयमद्भुतगुणंवव्रेस्वयंभारतीमद्
नापावतरश्चकास्तिभुवनेविख्यातकीर्तिः कृती ४ दंतियोतिद्विजप्रदीपविरुदोयोऽद्वैतविद्यागुरु
र्विश्वामित्रकुलांबुधेर्हिमकरोलक्ष्मीधरस्यात्मजः स्वायत्तीकृतवेदतंत्रनिचयोयः साग्निचिद्दीक्षि
जियाजीनेनद्विरलखेटकृतिनासेयंकृतिस्तन्यते ५ ग० अस्तिखलुप्रशस्तयशोमानंदितजननय
नतारकाद्वारकानामपुरी यत्रवनीपकघ्यावनीपकघ्याश्च वनीपकघ्याश्चाश्रमाः मालमनुस्तमालमं
नुः कृतमालमंतुश्चक्रीडाशैलः आर्याधिकानंददोनार्याधिकानंददः सभार्याधिकानंददश्चनृपति

वंशः
१

अन्यस्याः मातृकायाः आद्यं पत्रम्

Pandit Shri Gattulalaji Research Centre - Mumbai (India).

।। श्रीगणेशाय नमः ।।

अथ भैष्मीपरिणयचम्पूः आरभ्यते ।

पद्यम् -

यस्योपवीतगुण एव फणावृतैक-
वक्षोरुहः कुचपटीयति वामभागे ।।
तस्मै ममाऽस्तु तमसामवसानसीम्ने
चन्द्रार्धमौलिशिरसे महसे नमस्या ।।१।।

ललितगमना नार्यो राजन्मनोजनितान्तभाः
सुरतिसदृशस्ताः सन्मुख्यो भवानपि तत् ब्रुवे ।।
वनभुवमितो गेहादेको न गच्छतु मां विने-
त्यसकृदुदितः पुत्रः पित्रा जयत्यनघो हरिः ।।२।।

भ्रमरहिता सा कचवत्कुचवत्स्त्रीणां तु सरसहितशोभा ।।
लसदक्षरपीयूषाऽधरवत्कविता महात्मनां जीयात् ।।३।।

ध्वन्यध्वन्यधिकं चमत्कृतियुता यस्याद्भुताः सूक्तयः
सारस्येन सुधां सुधां विदधते तां शर्करां शर्कराम् ।।
सावित्र्याः प्रथमं यमद्भुतगुणं वव्रे स्वयं भारती
षड्भाषाचतुरश्चकास्ति भुवने विख्यातकीर्तिः कृती ।।४।।

दन्तिद्योतिदिवाप्रदीपबिरुदो योऽद्वैतविद्यागुरुर्-
विश्वामित्रकुलाम्बुधेर्हिमकरो लक्ष्मीधरस्यात्मजः ।।
स्वायत्तीकृतवेदतंत्रनिचयो यः साग्निचिद्विश्वजिद्-
याजी तेन हि रत्नखेटकृतिना सेयं कृतिस्तन्यते ।।५।।

गद्यम् - अस्ति खलु प्रशस्तशोभानन्दितजननयनतारका द्वारका नाम पुरी । यत्र च नीपहृद्या वनीपहृद्या अवनीपहृद्याश्चाश्रमाः मालमञ्जुस्तमालमञ्जुः कृतमालमञ्जुश्च क्रीडाशैलः आर्याधिकानन्ददो भार्याधिकानन्ददः सभार्याधिकानन्ददश्च भूपतिः किञ्च लसमानोऽनलसमानश्च पौरवर्गः वरतोल्लसिता नवरतोल्लसिताऽनवरतोल्लसिता च वनिताजनता । किञ्च । कृतानिमिषकुलतृप्तितया यत्र सरांसि सवन्ति रसवन्ति सारसवन्ति च नन्दितरामतपोपवनानि लवन्ति सालवन्ति रसालवन्ति च यत्र सुरसालावलीव सुरसालावली सदाखण्डलसद्विचाररमणीया तथापीयं मरालीगतिहृद्या सा पुनरमरालीगतिहृद्या निर्मलात्मभूदेवा इव निर्मलात्मभूदेवाः सरससरस्वतीव-लग्नप्रेमावगाहनश्रद्धान्वितास्तथाप्येतेऽभिजात-कीर्तिकलितास्ते पुनर्नाभिजातकीर्तिकलिताः सुपर्वसुन्दरास्ते जनास्तेजनाश्च तथापि कृशानुभावास्पदत्वमकृशानुभावस्पदत्वं च मुक्तास्थानत्वममुक्तास्थानत्वञ्चेति तेषां परस्परं भेदः विविधभ्रमरहितभावमनोहरा बालबकुलश्रीरिव बालबकुलश्रीस्तथापि बालापचितैका न वालापचितान्या केशप्रसाधनयोग्यैकाऽकेशप्रसाधनयोग्यान्या चेदिति भेदः ।

प० -

> **सौधा वियन्मध्यविराजमान-**
> **नक्षत्रमालोज्ज्वलकण्ठदेशाः ।।**
> **तथापि न स्त्रीजनसाम्यमापुर्-**
> **यतः सुधावन्त इति प्रसिद्धाः ।।६।।**

ग० - यत्र च वनितानाममृतार्णवन्ति कटाक्षावञ्चनानि च मनोजवन्ति सुरतानुरागा यौवनानि च । वनराजीवन्ति दृशः क्रीडास्थानानि च यत्र यादवानां धर्मनिष्ठतया पौरवन्ति प्रतापामण्डलानि च । जनितरामानुरागतया कुशलवन्ति संसारा यशांसि च कविसन्तोषानुकूलतया दानवन्ति व्यापारा धनधान्यानि च यत्र च सर्वज्ञतया भवन्ति निशामुखानीव द्विजमण्डलानि परलोकजयक्षमतया सारसवन्ति सरांसीव क्षत्रियवृन्दानि अनुग्रकरप्रसारहर्षकराजतया कुवन्ति श्रीकृष्णभुजमण्डलानीव वैश्यकदम्बानि यत्र च स्त्रीणां भ्रमन्ति नाभयो न बुधा उत्सर्पन्ति रोमावलयो न शत्रवः दरन्ति कण्ठा न पौराः गदन्ति वियोगा न दुर्भाषां जनाः हरन्ति हासा न धनानि चोराः । चरति कुसुमशरो न सम्पत् । यत्र यौवतं चतुरगतिकुञ्जरतिललितपदगतिलीलया वलतीतस्ततः किन्तु न चापति न वाशुगति । यत्र च

जनितचक्रवालभ्रमाश्च स्वकुचा इव वनिताः क्वचिद्धारिभिरालीजनैः क्वचित्कान्तैः सह क्रीडन्ति कन्तुकामितलीलया ।

यत्र च ।

प० -

गृहेषु बालाश्च वने लताश्च
हरन्ति चित्तं सुमनोविकासैः ॥
वयोविलासैश्च तथा च नाद्या
जाता विचित्रं विटपालिसक्ताः ॥७॥

ग० - यत्र चातिलसद्योगाभावस्तैलयंत्रेषु सतीव्रतापदोषत्वं वनितासु किं बहुना ।

प० -

वाताधिकत्वमश्वेषु फलेषु पटलस्थितिः ॥
अत एव गदोल्लासो युद्धे नान्यत्र दृश्यते ॥८॥

ग० - कुमारलीलास्पदान्यपि तारकानन्ददायीनि सुभद्राकृतीन्यपि सर्वमङ्गलाकृतीनि भवनानि ।

प० -

भुजङ्गहृद्या रोमाली वेणीभ्रमरमञ्जुला ॥
पल्लवेड्याऽधरपुटी न चर्या यत्र योषिताम् ॥९॥

ग० - यत्र चाविरतसुखदा तरौ तरौ छायेव छाया नीलकण्ठमनोहरा स्थाने स्थाने पर्वतभूरिव पर्वतभूर्विधिविहितमार्गप्रवृत्ता मुखे मुखे सरस्वतीव सरस्वती ।

प० -

नीलादिभिः परिवृतः पद्माढ्यः शङ्खभासुरः ॥
सुखदः सर्वभूतानां मुकुन्दो यत्र दृश्यते ॥१०॥

सवारुणी क्वाहिपुरी ससुरा क्वामरावती ॥
दाशार्हपूर्वपुण्यानां फलं क्व द्वारकावती ॥११॥

ग० – अस्त्वेतत्तामधिवसति स्म विजितसर्वपूर्वदेवो वासुदेवो नाम वसुधाधवः यस्तु नन्दव्रज इव मथुरायां कृतनागदमनो द्वारकायामप्यनुभूतकालिन्दीविहारः सप्तम इवाष्टमेऽपि अवतारे सिन्धुराजबन्धनोद्यतभीमसेनान्वितो नीलादिपरिवृतश्च बाल्य इव यौवनेऽपि गोमण्डलपरिपालनरतो वत्सलसत्प्रचारश्च यस्य वचनक्रम इव सत्यो भुज इव सालसदृशो वनिताः । यस्मिन् राजनि सुमनःसुपतितद्विजः पूषोग्रकराभियोगभाक्कमलवर्गश्च छिन्नकर्णो नरेष्वर्जुनः पतितः सुखदर्शको वनितानां रतकालः । अपि च सुवृतस्य कुचस्य कठिन इति पीडाऽपापस्य कूपस्य विरस इति खननं सुमनोभूषितानां कुन्तलानां वक्रा इत्याकर्षणं सुरक्तस्य वनितोष्ठस्याऽधर इति खण्डनमपि च दोषानुबद्धः कामपुत्रोऽनिरुद्धो विचाररहितो ग्रीष्मजलाशयः सत्कीर्तिः ।

प० –

बन्धो मानच्युतिरपि हेला सन्मालिकागुणच्छेदः ॥
यस्मिन् राजन्यधरप्रीतिर्द्विजखण्डनं च सुरतेऽभूत् ॥१२॥

विषमहितत्वं भङ्गो जाड्यं पङ्को विभाति स्म ॥
यत्र जलाशयानां वर्गेषु सदैव नैव पौराणाम् ॥१३॥

ग० – स हि कदाचित्पुरन्दर इव धर्मराजधनञ्जयादिपरिवृतो ललिताप्सरःकुलमसेवत क्वचिन्मदन इव विलसद्रतिः पञ्चाननेऽप्युग्रे शरान्मुमोच । चन्द्र इव राजाभिख्यामनोहरः कुवलयेषु मृदुकरप्रसारमकरोत् । किं पल्लवितेन ।

प० –

स्वचरित्रेण मुरारिर्बहुधा वनवृत्तिरम्यशोभाढ्यः ॥
हयहरिणमीनवर्गानद्भुतरसमग्नचेतसश्चक्रे ॥१४॥

ग० – अस्त्वेतत् । स जयति ।

प० –

मुखं राजतिरस्कारि जितहंसः पराक्रमः ॥
यस्य कीर्तिप्रसारोऽपि राजहंसमदापहः ॥१५॥

ग० - अथ कदाचित् ।

अरुणद्युतिभासुराधरश्रीरिव नाभीवसुचक्रलोभनीया ॥
अपि काऽल्पकाला मृगेक्षणानां गतिवद्भाति च हंससशोभितेयम् ॥१६॥ इति ।

ग० - बन्दिवृन्दसुन्दरालापैरावेदितप्रबोधकालो विविधभोगमनोज्ञपर्यङ्कादिव विष्णुर्मञ्चादुत्थाय उद्बोधितवारिजातं चक्रवाककुलपारिजातं प्रणम्य शिवाकरं दिवाकरं कुङ्कुमसौभाग्यलालितालिकाभिः कमलाधिकस्वरूपाभिः कलितमदाभिः प्रमदाभिरद्भिश्च स्नापितः आत्मवत्कल्याणगुणं वसनं परिधाय निभाल्य सरसं मुकुरं भद्रश्रीख्यातिकलितं चन्दनं धृत्वा माधवाभिधां कामपि देवतामभ्यर्च्य सूपकाराहृतमन्नं सत्कृत्य सद्वृत्तरत्नमण्डितं भूषागणं मानयन् सुग्रीवालङ्कृतं रथमधिरुह्य सुरसभावमतिदक्षं सभासन्निवेशम् आगत्य स्पर्शानन्दजनकं सिंहासनमधिरुह्य विविधव्यापारेण कालं यापयति वासुदेवे, तमुद्धवः प्राह ।

प० -

देव त्वमवननिरतो विरसानन्दो विभाति तव शत्रुः ॥
ग्रीष्मेऽस्मिन्नेवान्यः सूर्योऽपि प्राप पुष्करस्थानम् ॥१७॥

द्रष्टव्यः कान्तारे कार्यः सरसीषु शम्बरविहारः ॥
गम्यो रैवतकोऽद्री राजत्कमलः स एव मतः ॥१८॥

किन्नरीमणितैर्यत्र स्पष्टलीलाः कपोतकाः ॥
कूजन्तोऽपि न शक्तास्ते ग्रहीतुं श्येनसञ्चयैः ॥१९॥

मुखैर्न पद्मानि कुचैर्न कोकाः
कचैर्न भृङ्गा अपि नाभिभिश्च ॥
नावर्तवर्गाः सरसीविहारे
देवाङ्गनानां कलयन्ति भेदम् ॥२०॥

गीतवत्तालललितः कुचवत्कोकसुन्दरः ॥
चित्तवन्मन्मथाक्रान्तो मुग्धानां रैवताचलः ॥२१॥ इति ।

ग० - तदुक्तिं श्रुत्वा देवोऽपि हसंस्तत्कालयोग्यपरिवारः सर्वतोमुखसम्पदः पुरो निर्गत्य समुद्राच्च

पश्यन् वनिताकुचयुगमिव सरसं वृत्तं कुम्भयुगमुद्धृतं विप्रयुग्मं शृङ्गरहितं वृषभं मार्गशकुनमाकलयन् श्रीजन्मनिदानं राजीवविहाररमणीयं सोमोत्पत्तिरम्यं कोककुलानुविद्धं पाठीनसहस्त्रशोभितं सिन्धुमतीत्य तादृग्गुणं रैवतकमवाप्य विविधसालकुलश्लाघ्ये वने वने विहरद्भिरशेषैरपि वारुणीसङ्गसुखितैर्मनोहरतालजातेन गेयेन पेयेन च समदैः कं कं कं पिबन्तं पश्येति तरलालापैर्बान्धवैः परिवृतो विजहार ।

प० -

ग्रीष्मोऽपि रैवतगुणाद्वसन्त इव लक्षितः ।।
नो चेत्तत्र कथं कुर्युर्यादवास्ते मधूत्सवम् ।।२२।।

ग० - अस्त्वेतत् सदैवात्र मत्तकोकिलसूक्तिमाकर्ण्यात्रेयं हरिणीपङ्क्तिश्च मत्ता विहरति चित्रपदाभिरामा हंसमाला चेयं मनोरमा चम्पकमाला चात्र विलसति इति रुचिरया प्रियम्वदया वनदेवतया कवितयेव कथितानि कानिचित्तत्र वृत्तान्यभिनन्द्य सानन्दं विहरति भगवति मधुमथने, कदाचित् ।

प० -

कान्ताम्बरोल्लसितपीनपयोधरश्री-
सन्दर्शनप्रमदनर्त्तितनीलकण्ठा ।।
प्रावृट्कला समभवच्छरजन्महेतुर्-
नानागमप्रणयिनी खलु पार्वतीव ।।२३।।

जठराहितभुवनत्वादुदरस्थितकमलभासुरत्वाच्च ।।
सरसत्वाज्जीमूतो लीलां वहतीव तव कृष्ण ।।२४।।

प्राप्ताचिरेणातनुतापतप्तं
गिरिं शितापाङ्गशराभिरामा ।।
तत्पादनिक्षिप्तकरा प्रसाद्य
प्रावट्कला सज्जघनाभिरेमे ।।२५।।

वर्षास्वर्कलतैवास्य शैलस्य प्रीतिदा मता ।।
गिरीशोऽयमियं चापि यदपर्णा बभूव ह ।।२६।।

हा पल्लवासक्ततया पुरा सन्-
त्यक्तापि जातिः किल माधवेन ।।
संवीक्ष्य वर्षासु गिरिस्थितं तं
नूनं रहस्युत्कलिकां बभार ।।२७।।

सर्वत्र लासकीवृन्दं दर्शयित्वा पयोधरम् ।।
नटत्येषा मयूरालिस्तं दृष्ट्वेत्यद्भुतं महत् ।।२८।।

शतपत्रत्वेन समौ पद्ममयूरौ तथापि शरवर्षात् ।।
आद्यं दुःखि क्लीबं पुमान् द्वितीयः सुखी जातः ।।२९।।

ग० - किञ्च देवायं कालो दुर्दिनस्थितिरपि प्रकटितवराहश्रीरिति कस्य न विस्मयाय । तद्गणामीयं ते वेला मनोज्ञा मृगयात्रोल्लसितेति । तच्छ्रुत्वा मृगयाकालोऽयमिति ज्ञात्वा वारबाणेन बाणवारेण च भूषितो गहनमवजगाहे । तदा पुनरुद्धवः प्राह । देव सृगालभूदारवधस्तु करवीरपुरे संवृत्तोऽच्छभल्लस्तु पाणिपल्लवलालित एव नीलेयं महिषीततिः करुणापदमेव सिंहास्तु हरय एव सन्त्येवं मृगया निष्फलैव दृश्यत इति ।

अस्त्वेतत् ।

प० -

दानप्रभावात् किल पारिजातम्
एकं गतोत्साहमसौ चकार ।।
न केवलं तन्मृगयाविहारे
द्विपारिजातं च विचित्रमेतत् ।।३०।।

लज्जाविरास्ते वदतोऽस्य वृत्तं
हासास्पदं कस्य भवेन्न चैतत् ।।
स्वयं विधुत्वेन मतोऽपि चर्क्ष-
वधूः समन्तान्निजघान यस्मात् ।।३१।।

भल्लूकवृन्दं निहतं यदत्र
किंवा मुरारिर्जनितापराधः ॥
स जाम्बवानेव विगर्हणीयः
प्रागेव कन्यां न ददौ यदस्मै ॥३२॥

इतस्ततो बाणगणैः समन्तात्
यत्कृष्णसारानसूँश्चकार ॥
रूपेण पूर्वं किल कर्मणाद्य
स शम्बरारातिरिति प्रसिद्धः ॥३३॥

मीलयन् पुण्डरीकाणां कुलं भूपशिरोमणिः ॥
तदा स वर्धयामास राजत्वं देवकीसुतः ॥३४॥

किं बहुना ।

मृगेषु तारा हरिषु सूर्यो भूदारसञ्जये ॥
उग्रसेनः परित्यक्तः पुण्डरीकेषु दिग्गजः ॥३५॥

ग० - ततश्च मृगयाश्रान्तः कस्यचिज्जम्बूतरोरधस्तान्निषण्णः कञ्चन रल्लकशेषं जरद्द्विजं दृष्ट्वा यात्रिक इत आगतस्तिष्ठ क्षणमत्र श्रान्तोऽसि सान्तोषिकां ब्रूहि कामपि विचित्रां वार्तामित्यभिधाय वीरवलयं स्वहस्तादाकृष्य ब्राह्मणाय दत्तवान् । सोऽपि दुर्गतः सानन्दः कोऽप्ययं महानुभावो न केवलं सफलो यत्करगत एव मार्गणः किन्तु पुरःस्थितोपीति चिन्तयन् जय जय जीवेत्याशिषाऽभिनन्द्य प्राह । देव यथा दानधारा भूषयेत्पुन्नागं न तथा शून्यकरत्वमस्त्वेतत् दानशक्तिस्त्वयि मदो मामवलम्बत इति चित्रमेतत् । तिष्ठत्वेतदपि । मया भ्रमता भूमण्डलं काश्यां गङ्गा विशालायां व्यासवाणी विदर्भदेशे काचन कन्यामणी च प्रत्यक्षविषयीकृता । अद्य तां ध्यायतो मे मनस्यभूच्चिन्ता...

प० -

अमृतोल्लसद्रुचिरगाधरसा
कलधौतवर्णरुचिरा सततम् ॥
शुभभारतैकसुखदा कमियं
निजयोगधन्यजनुषं तनुयात् ॥३६॥

ग० - इति देवेयं सुपर्वश्लाघ्यगुणा यथाज्ञानमनुवर्णितेति प्रमिताक्षरोल्लसितां वाचमभिधाय तूर्ष्णीं स्थिते तस्मिन् देवोऽपि स्वमनस्यचिन्तयत् सम्भाषणीयोऽयं द्विजः यदनल्पस्नेहः श्लेषसंस्काररुचिरास्य सरस्वती । सूक्तं हि केनचित्

प० -

शिलष्टा सभङ्गा सद्वर्ण्या निर्दोषा सद्गुणा मुहुः ।।
नानाभङ्गीविलासा च कृतिर्विकृतिरन्यथा ।।३७।।

ग० - भवतु तावत्पृच्छामि वृत्तान्तशेषम् इत्यालोच्य पुनः प्राह । अये द्विजन्मन् श्लेषभाषणविशेषज्ञ कथय कथनीयं श्रवणरसायनं चरित्रं तस्य कन्यारत्नस्येति । सोऽप्यवदत् द्विजन्मा । देव ।

प० -

सर्वालङ्कारयुक्तापि नाश्लिष्टा वनितेव सा ।।
वाणी मनोजातसुखं प्रौढानां न तनोति हि ।।३८।।

ग० - अस्त्वेतत् । प्रकृतमनुसरामः । सा कन्यामतल्लिका लक्ष्मीरिव विवाहयोग्या । शिशुपालाय तदग्रजन्मना क्लृप्तापि स्वकुन्तलवत्कृष्णभावमावहति रतिरिवानन्यजातानुरागोल्लसिता भूत्वागाधेयस्थितिरिव अग्रजातिक्रमणाय स्पृहयतीति श्रुतमन्यच्च कर्णाकर्णिकयाऽऽकर्णितं भगवान् वासुदेवोऽपि तद्गुणाऽऽकर्णनशिथिलहृदयसारः स्वयं कृष्णो रक्तो भूत्वा धवलश्च बभूव ह ।

अपि च ।

प० -

यस्या गुरुर्नितम्बो बिम्बसहोदरोऽधरो धरहृद्यः ।।
कुचभारो भारजिता तनुलता लतालसत्स्थितिः ।।३९।।

ग० - तालसत्स्थितिरिति गानरसानुरूपानुकारिणी रूपसम्पत् किञ्चाभ्रमहितां सज्जघनां तडित्कान्तिविराजितां वर्षारमां पश्यतो मे चेतः सरणिमारोहति सा कुरङ्गशावलोचना अथवा नीरदशोभां वहतीयं किं तां श्रीरिति जानासि नहि नहि श्रीः हरिहृदये वसति तस्यास्तु हृदये हरिर्वसति ।

किं बहुना ।

प० -

अधरं कुचयुग्मं च तस्याश्चित्तं च राजते ।।
सुरागहृद्यं राजाधिराज ते करवत्सदा ।।४०।।

ग० - देव कथितं कथनीयं यामि रामसेतुमिति । देवोऽपि ।

प० -

रामचन्द्र महीपाल स्वस्त्यस्तु तव सेतवे ।।
सीताजीवातवे शश्वज्जातवेपथुयातवे ।।४१।। इति ।

ग० - सभक्त्युन्मेषं वदँस्तमनुज्ञाप्य अहो विचित्रोऽयं विदर्भदेशोऽयं दमयन्त्यादिस्त्रीरत्नजनिनिदानम् । प्रायेण सा युवजनमनोभृङ्गसञ्चरणविहरणोद्यानवाटिका विदर्भराजसुतैव भवेत् । या पूर्वं श्रुता कलहप्रियान्महर्षेरिति चिन्तयन्नेव द्वारकामगमत् । ततः प्रभृति न सुखयति वनमाला कण्ठगता पर्वतगता च नानन्दयति शय्या कविजनक्लृप्ता दासीजनक्लृप्ता च न शीतलश्चन्द्रो गगनगतोऽनुलेपनगतश्च । चित्रमेतत् ।

प० -

भूदारकृष्णनिर्जरतरक्षुरक्ताक्षभावभाजि हरौ ।।
एतस्मिन् क्षिप्तशरः कृत्स्नं मृगयाफलं स्मरो लेभे ।।४२।।

अपि च ।

घनपुष्पमयं किरन्नसौ शरजालं मुदिरः किलैकतः ।।
मदनोऽपि तथैकतो हरिं व्यथयत्यात्मसरूपसम्पदम् ।।४३।।

सर्वत्र विरतिरासीद्भीष्मककन्याधिविन्नचित्तस्य ।।
तन्नहि चित्रं यन्नासुखयद्राधापयोधरभरोऽपि ।।४४।।

अत्रान्तरे ।

स हि राजहंसमण्डलरोधी बहुनीरसस्यहितः ।।
यातो वर्षासमयश्चपलानन्दी कियच्चिरञ्जीवेत् ।।४५।।

हरिचन्दनकलिता सा गौराम्बरधारिणी सुचन्द्रास्या ।।
कुमुदसुमहास्यशोभा प्राप्ता ज्योत्स्नाभिसारिकेव शरत् ।।४६।।

ग० - अथ तस्मिन् उत्फुल्लमल्लिकाजाले कान्तयुग्युवतीमतल्लिकानुकूले भूषितविविधलतालवाले कमलवनावलीलोललोलम्बजाले चारुशीले शरत्कालेऽपि विफलितमनोरथे वासुदेवे प्राप्तधनुराक्रान्तावपि कन्यामेव चिन्तयति कश्चिद्ब्राह्मणः आगत्य विधिवत्पूजितः कथयाम्बभूव । देव ।

प० -

भूभृत्कन्या गौरी सा काचिद्राजशेखरप्रेष्ठा ।।
सुकुमारी तव भूयादतनुसुखावाप्तिहेतुरविलम्बम् ।।४७।।

ग० - देवोऽप्यहो विचित्रेयमाशिषां परिपाटी प्रायेण सन्देशहारको भवेद्वैदर्भ्याय भूभृदादिशब्दान् श्लिष्टान् व्यवहरति अथवास्य श्लोकस्य पार्वतीमात्रपरत्वेऽपि किं नश्छिन्नं कन्यार्थिनि मयि चिन्तयति यदृच्छयोक्तापि इयमुक्तिः साधयति समीहितं यतः पुराणेषु श्रूयते दाम्पत्यार्थम् उमां सतीं भजेतेत्यनेकशिखरमारूढं रहस्यं रहस्येवापृच्छत् भूदेव को भवान् कुत आगमनं किमर्थं वेति । सोऽपि पुनः प्राह ।

देव ज्ञात एव स्यात् विदर्भाधिपतिर्भीष्मक इति । यस्त्वपरित्यक्तमार्गणो गुणेनैव परलोकं जयतीत्यद्भुतमेतत् यश्च मुखे मनोहराङ्गां भुजे ज्यां हृदि क्षमां भूदेव्या विरहमसहमान इव बिभर्त्ति यस्य च नागारिप्रतिभटः पराक्रम इवाश्वचयः भूभृन्मनोज्ञः स्त्रीजन इव गजगणो यस्मिन् राजनि श्रीमत्सरस्थितिः क्रीडोद्यानेषु स्तनेषु च मदाश्लिष्टत्वं गजेष्वङ्गनायां चास्त्वेतत्तस्य रुक्मिणी नाम तनया ।

प० -

स्तनद्वयं गानशरीरवच्च
तस्यां पुनर्यौवनमाविरासीत् ।।
क्रमेण तल्लोचनलोभनीय-
रम्याकृतौ मञ्जुलतालसच्छ्रि ।।४८।।

जलाशये पीनपयोधरे च
हासे च तस्याः कमनीयकीर्तेः ।।
त्वदीयपाणाविव कंसशत्रो
लसत्यलं सा हरिचन्दनश्रीः ।।४९।।

मदनागमहितभावं गतिरपि वेणी च यौवनभरश्च ।।
धत्ते कामस्त्रीवत् गोपालमणे न कामना तस्याः ।।५०।।

रोमावली हरिनिभा तालहृद्यं कुचद्वयम् ।।
देहकान्तिः सरोजाक्ष्याः हरितालमनोहरा ।।५१।।

किं बहुना कथनायासेन ।

आदावेवोल्लसद्रूपं यौवनश्रीस्ततः परम् ।।
तद्धेम्नः पटमामोद इव भाति महीपते ।।५२।।

एवं स्थिते कदाचित् ।

हंसकुलानन्दकरो विधुरुचिरुचिरश्च नारदो नाम्ना ।।
चित्रचरित्रो भवनं सोऽभ्यागाच्चञ्चलानन्दः ।।५३।।

ग० - स च राज्ञा प्रापितमानो जगद्वार्तावर्णनपरः कस्यचिद्राज्ञो गुणानवर्णयत् । तथाहि । यस्य चारिचक्रं पाणौ खण्डितं च सुमनोमाला कण्ठे पार्श्वे च वासवोऽग्रजो भक्तश्च वाहिनीपतिः सात्यकिः पुरीपरिखा च सुराः पौरवर्गो विधेयाश्च समदया गजपङ्क्त्या सदृशी नीतिः सदाऽभयापुर्या सदृशी प्रजा किं बहुना स एव श्रीनिवास इति न केवलमेतदेव एकान्ते भर्तृदारिकामाहूयाकथयत् । अयि भर्तृदारिके वत्से भैष्मि यस्तु तव लोचनवत्फालवच्चापाङ्गसुन्दरः यस्तव कुचवच्चक्रशोभान्वितः श्रीधरोन्नतिख्यातिकलितश्च यश्च यत्करश्च त्वमिव कमलाधिकशोभावहो यस्योद्यानसन्निवेशश्च तव फालवत्कटाक्षवद्रोहिताङ्कमनोहरो भ्रमरहितश्च वासुदेवश्च । अयि नृपनन्दिनि यस्य च ।

प० -

मुखे दन्ता गृहे कान्ता मण्डलेषु द्विजर्षभाः ।।
मुक्तोपमा विराजन्ते न सभायां वचःक्रमाः ।।५४।।

ग० - अयमेव पुरा नीलादीनां कलत्रभावमङ्गीचकारेदानीं नीलाद्या अस्य कलत्रभावमङ्गीकुर्वन्ति । पूर्वं चक्रं शशापेदानीं चक्रं लालयति । प्रागहल्यानन्ददायीदानीं तु हल्यानन्ददायी किं पल्लवेन ।

प० -

यद्यस्त्यसारभवसौख्यविहारवाञ्छा
यद्यादरो वचसि मेऽस्ति च तथ्यपथ्ये ।।
तर्ह्येव सुभ्रु हरिचन्दनपादपं तं
मल्लीलतेव भज यादवसार्वभौमम् ।।५५।।

ग० - इत्युक्त्वा प्रयाते च यथाभिमतं तस्मिन् कान्तिजित्पारदे सन्धानकरणविशारदे नारदे देवे भीष्मकेऽपि देया तस्मै कन्यकेति निश्चितचेतस्यमितम्पचमानन्दं वहन्त्यां महिष्याम् अहंपूर्विकया प्रादुर्भवल्लज्जा मदनावेशव्याकुलायां भर्त्तृदारिकायां कथं कथमपि परिजनत आकर्ण्य तद्वृत्तान्तं रुक्मी नाम राजपुत्रः सर्वामपि परिषदं निर्भर्त्सयन् कोपकलुषाङ्गिरमाहाहोऽस्य तातस्य वार्धक्यविलासो यदवरे कृष्णे वरबुद्धिमुत्पादयति तथाहि यस्य च जनन्याराधनसामग्री मातुलहतिः आभिरूप्यं कुब्जावशीकरणं महत्ता परदाराभिगमनं भक्ताधीनता च जीर्णतरुभञ्जनम् अपि च पराक्रमः सृगालवधः परलोकसाधनोपायः वृद्धश्रवोमखभङ्गो नन्दगोपपालनशैली चतुरगोपहतिरस्त्वेतत् अहह

प० -

कोकानन्दहरस्तथाऽऽगमसमुच्छेदी द्विजप्राणहृत्
कृष्णो मारितधेनुकश्च वृषहा चक्षुःश्रवःक्लेशदः ।।
क्वायं क्वेयमनन्यसाम्यगुणयुग्राजाधिराजस्य ते
कन्या भ्रातृमती मया त्रिभुवनत्राणैकदक्षेण या ।।५६।।

ग० - मम त्वयं निश्चयोऽयमसौधराजितोयमसौजन्यनिपुणोऽयमसौ भाग्यनिधिरविक्रमधैर्यशोभितः सदैव चक्रमेलकस्वभावो नलसमानरूपो राजा शिशुपालः पद्माकृतिरियं कनीयसी तयोः परमयोग्य एव संयोग इति । ततश्चैवमुपश्लोकिते तेन शिशुपाले आलम्बितमौने भूपाले यातेषु केषुचिद्दिवसेषु कदाचित्कमलवदनोल्लसद्रसः कलहंसानन्दप्रथमावतरणं ललितलवङ्गिकाप्रणयभूमिः विरचितबकुलमालाविभवोऽपहृतमालतीमानो माधव इव वसन्तसमयः समाजगाम । अथवा अलमुपमित्या यतः ।

प० -

मदनजन्मभुवा सुमनःकुल-
प्रणयिना सुरभित्वमुपेयुषा ।।
अपि वसन्तदिनेन वसुन्धरा -
रमणमाधवता प्रकटीकृता ।।५७।।

यत्र स्त्रीणां मनोवृत्तिर्लतेवोत्कलिकान्विता
कामवद्रतिरागाढ्या कान्तामोदकृदन्यवत् ।।
युक्तानामप्ययुक्तानां यत्र भिन्नरसं मनः
प्रभाताब्जनिभं वक्त्रं नेत्रं च कमलोज्ज्वलम् ।।५८।।

ग० - तदनु भर्तृदारिका प्रवालकरा स्वक्षरामृतरमणीयां कविजनतासरस्वतीमिव वरदां नाम तरङ्गिणीं गुरुजनाज्ञया सवयसीभिः स्वसखिभिर्बालेऽतनुविहारक्लान्तासि मुग्धेक्षणे किमद्यापि चापक्रीडापरायणासि अबले शरवृन्दे पतसि उन्मत्ते क्षीरावतीर्णाप्यक्षीरासि तन्वि कीलालार्द्रं वसनं परिहर अबुधे कुतो विषं पिबसि अपापे त्यजामूदृशङ्कबन्धानुरागमिति विविधरसविहारव्याहारचतुराभिर्निर्वर्तितजलक्रीडा यावद्भवनमायाति तावन्मल्लिका नाम सखी प्राह ।

भर्तृदारिके विचित्रमिदम् ।

प० -

भृङ्गोऽभून्मधुपः कुचस्तनकिलोद्वृत्तोऽनिले मन्दता
साऽनङ्गाभिमतिः स्मरस्य कुपितस्त्रीणां तु मानच्युतिः ।।
प्रायश्चित्तसुमेलनव्यसनिता यूनोरये शुद्धता
तन्वङ्गि प्रणयस्य विस्मयकरी रीतिर्वसन्तागमे ।।५९।।

किञ्च ।

अयि कृष्णभ्रमरोऽयं ललितलताङ्गीकृतोन्नतप्रीतिः ।।
कुसुमेषु लोलचेता भ्रमति च चपलास्यचुम्बनोद्युक्तः ।।६०।। इति ।

ग० - श्रुत्वाथ सा देवी वासुदेवः कियत्कालं गृह्णीयादाकृतिं बालिका कृष्णभ्रमरादिशब्दै-रुद्बोधितसंस्कारापि कामादिभिरुपचितविकारा भोगद्रव्येषु प्रकटितनकारा मन्दमारुतसंसर्गबहुलीकृतविरहा बहिष्ठात् सखीभिरन्तश्चिन्तया चावलम्बिता कथं कथमपि शय्याभवनमागता । तदारभ्य किञ्चिदप्यन्धो न पश्यति जले विषबुद्धिं तनोति परिवादध्वनिं न शृणोति अलङ्काराभियोगः शत्रोरस्त्विति जल्पती नीता च सा दुरात्मना कुसुमधन्वना वलक्षतां नवलक्षतां चैवं स्थिते नेत्रामये दीपवन्मूर्तिमत्कोकाङ्गनाविरहतापवत् घनीभूतमदनप्रतापवत्कलितविरहिणीजनजूर्त्तिः सुधामूर्तिर्भर्तृदारिका हृदयाद्रागं स्वतः कुवलयपरिपालनधुरीणमिवादायोदयगिरिशिखरमवाप । अथ भर्तृदारिका चन्द्रादीन् लक्षीकृत्याह ।

प० -

सम्पूर्णः कमलान्वितो विधुरयं पादे करे भिन्नता
नैवास्यैव मरुन्नियोगनिरतः कृष्णोक्तिभिर्जीवति ।।
एतस्यागमनन्दिनः सुमनसां व्राता इतीदं क्षमं
सर्वं तन्वि नियुक्तमेतदमुना कामोऽयमुत्पादितः ।।६१।।

विप्रनाथयुतत्वाच्च शर्वं काम न बाधसे ।।
विप्रयुक्ताप्यहं नाथयोगाभावात्सुदुःखिता ।।६२।।

वायुवन्नहि मन्दस्त्वमवश्यायी न चन्द्रवत् ।।
सुमनोधर्मयुक्तस्त्वं काम मा पीडय स्त्रियम् ।।६३।। इति ।

ग० - तच्छ्रुत्वा अये इयमतिभूमिं प्रापिता मदनेन तदन्यतो नयाम्येनाम् इत्यालोच्य पुनर्मल्लिका प्राह । भर्तृदारिके चित्रमिदमेवं धारयातनुरणसामग्री परिमिलिता यदिदानीम् ।

प० -

किरति सुधांशुर्गोगणमसकृन्मारोऽपि सोऽपि मधुमासः
तरुणशिलीमुखजालं मध्यस्थो वायुरपि च मन्दगतिः ।।
बाणेष्वारोप्य गुणान्निधाय चापं वियोगिनीनयने
स्वयमतनुर्जगदेतज्जयति सुमास्त्रो विचित्रधानुष्कः ।।६४।।

ग० - ततश्च सा भर्तृदारिका वीणामादाय गायन्तीं प्रति

प० -

गीते नालमये कस्माच्चन्द्रमाः पल्लवीभवेत् ॥
स किं स्थाणुर्न किं स्थाणुरयं स्थाणुशिरोमणिः ॥६५॥ इति ।

ग० - मुहुर्मुहुराम्रेडयन्ती चन्द्रादीन् लक्षीकृत्य

प० -

चन्द्रं विनिर्जित्य शरीरकान्त्या
मधूल्लसन्माधवमालपेन ॥
कामाशुगासारनिवारणाय
निःश्वासवातास्त्रमथाललम्बे ॥६६॥

ग० - निःश्वस्य चासह्यत्वान्मदनवेदनायाः शय्यां लक्षीकृत्य निपपात । ततश्च मल्लिकया

प० -

त्वं पूर्वं स्थाणुविद्वेषादिमां कुसुमसायक ॥
मा पीडय मुधा मध्यस्थाणुभावमियं गता ॥ ६७॥

ग० - इति श्लोके पठ्यमानेऽपि ।

प० -

न रसे नापि सद्वृत्ते न रीतौ नाप्यलङ्कृतौ ॥
तस्याश्चित्तप्रसारोऽभूच्छय्यैवासीत्सुसम्मता ॥६८॥

ततश्च ।

प० -

अकाण्डे भङ्क्तुमैच्छत्तां रम्भावत्कामसिन्धुरः ॥
मनोलब्धैस्तदाश्लेषैस्तत्र सिंहपटायितम् ॥६९॥

ग० - एतस्मिन् व्यतिकरे चन्द्रिका नाम सहचरी प्राह । सखि भर्तृदारिके अलं चिन्तयास्ति कश्चिदुपायः सुलभ एव शृणु सावधानमनाः अद्यैव सहास्माभिर्द्वारकाप्रयाणमभिरोचय कृष्णस्ते तापमपहरति तस्मिन्ननभिनन्दितमत्प्रणये कथमिति चिन्तां दूरीकुरु को वा सचेतनस्त्वदाकृष्टचेता न भवेत्, तद्भणामि ।

प० -

कल्याणि ते रूपमिदं सम्बुद्धिरिव गानवत् ।।
अपि तानि दृगब्जानि रागिणं कुर्युरच्युतम् ।।७०।।

ग० - इत्येवमुक्त्वाविरतवाचि तस्यां तोकस्मितकान्तितिरस्कृतचन्द्रिकायां भर्त्तृदारिकायां साधुश्लेषवादधुरीणे साधुजनाकर्णितपूर्वपद्यनिर्माणकलानन्दितचतुरहृदये सम्यगुक्तमिति पुनः पुनः श्लाघिततद्वाचि सवयसीकदम्बे ।

अथ मल्लिका प्राह ।

प० -

राधाद्यानन्दकन्दोऽयं गवां सञ्चारयन् कुलम् ।।
एषः क्षपाकरो लीलां नन्दसूनोः समादधे ।।७१।। इति ।

ग० - तच्छ्रुत्वा चन्द्रसूर्ययोः साम्यमसहमाना किञ्चित्कोपिनीव बभाण ।

सखि किं किमुक्तं भवत्या वाचारम्भणीयोऽयमुपन्यासो यत्क्रियादिसाम्यात्समत्वोपपादनमिति ।

प० -

कथञ्चित्केनचित्साम्यं कश्चित्सखि लभेत चेत् ।।
लभेतापि बकश्चन्द्रसाम्यं स्थाणुशिरःस्थितः ।।७२।।

ततश्चन्द्रिका नाम सखी ।

ग० - अहो अननुभूतकान्तसुखाया अप्येतस्या विचित्रेयं पक्षपातपरिपाटी । हंहो कृतकृत्यता चेत्तदा किं किं कुर्यादिति । अस्याश्चित्तानन्ददिव्यौषधिरसावित्यालोच्य अन्तरेव हसन्ती निर्भर्त्सयन्ती मल्लिका प्राह भर्त्तृदारिकाम् ।

ग० - भर्त्तृदारिके पूज्यमानमभिहितं भवत्या पतङ्गनाममात्रेण किं सूर्यसाम्यमाप्नोति शलभो ज्योतिरिङ्गणो वा खद्योताभिधानसाधारण्यात् । अस्त्वेतत् । वक्तुं न जानाति मल्लिका । तदहं किञ्चिद्ब्रवीमि चन्द्रवृत्तान्तम् अयं किल रेवतीजानी रोहिणीमपि हुं जानासि किल तथाकरोति किञ्च दाम्भिकोऽयं सप्तविंशतितारापतिरपि शततारापतिरिति स्वाभिख्यां ख्यापयति जना अपि केचिद्दाम्भिकरीत्याऽमूदृशमपि द्विजराजाभिधानरमणीय इति सम्वदन्ति स हि कुतो वृषभारोहे द्विजश्चेन्नक्षत्राधिपो भवेद्राजा चेत् सम्यक् कृतं विधात्रा विना कारणेन जगद्बाधकस्यास्य अनङ्गतार्पणकाले चन्द्रहतकोऽप्यस्य सामन्त इति मृगकृत्तिकावशेषः कृतो न केवलमेतदेव तदैव वसन्तस्यापि तत्सम्बन्धमहिम्नैव जातिभ्रष्टता अत एवेयमसुमना लता आस्ते आशुगस्यापि वायोः आशुगतत्याजनाद्धर्महानिः सञ्जाता नो चेत्कथमयं मन्दः सम्वृत्तः अथवा किमस्माकं देवेषु दोषारोपणदुर्वासनाभ्यासेनेति यावद्वदति तावदेव मल्लिका सखी प्राह ।

प० -

सम्मान्यगोभिरचिराद्रक्तोऽसावम्बरान्तमवलम्ब्य ।।
राकां चन्द्रो रमयति कान्तां च यथोत्तमः कान्तः ।।७३।।

ग० - इत्याकर्ण्य तदुपश्रुतिं मन्वाना किञ्चित्सुखितहृदया कुमारीप्रासादमारुरोह देव किं ब्रवीमि दूनमेव जनं दुःखयति दैवम् अत्रान्तरे स जरासूतः शिशुपालो रुक्मिणाहूतः समायात एव विवाहार्थमिति वार्तामाश्रुत्याङ्गारवर्षमिव ग्रीष्मे कलयन्ती देवस्य सन्निधिं प्रेषयामास मां देवायं वृत्तान्त इयं तस्याः स्थितिरिदं पत्रं तया कातरचित्तया विलिखितमितः परं देवः प्रमाणमित्यभिधाय जोषमासीत् देवोऽपि श्रुतवृत्तान्तः पत्रिकामादायान्तरजानत्

प० -

दृक्-शरजालं चर्यामुग्धाधर्मं मनोऽपि ललितगुणम् ।।
मुञ्चतु नाम न लक्ष्यं जह्यां त्वां लक्ष्यहानिभयात् ।।७४।।

ग० - इतीमामाज्ञाप्यात्मा परीत उत्कण्ठया न सेनया आलोच्यमानसो नोद्धवेन सह ससहायो मदनेन न रौहिणीयेन गजाश्वरूपं बलं विहाय केवलभुजगतमेवावलम्ब्य रथमारोप्य द्विजं मनोरथं वा भैष्मीमेकेनैवाह्ना प्राप्य कुण्डिनपुरबाह्योपवनं द्विजन्मानं पुरतो विसर्जयामास ।

प० -

प्रायो विदर्भकन्यानां द्विजो याति सहायताम् ।।
जालपादाकृतिर्भैम्या भैष्म्यास्तु मनुजाकृतिः ।।७५।।

ग० - स च ब्राह्मणोऽपि कुमारीप्रासादे मालतीद्वितीयां भर्तृदारिके किमिति विषीदस्यचिरादायाति शार्ङ्गपाणिः कथय कथय किं ते चिन्तानिदानं किं ब्राह्मणो विलम्बितगमनो भवेदिति वा तन्न सम्भवति यतोऽयं द्विजः । अथ ज्ञातवृत्तान्तोऽपि सपक्षश्चापि नागच्छेत्कृष्ण इति वा तदप्यसमञ्जसं यतोऽयमङ्गुलीदर्शनेन हस्तमेव गिलतीति न किं ज्ञातं त्वया गुरुभिर्निषिध्यागमनो भवेदिति वै तदप्यसङ्गतं यत्सर्वस्मादधिकगुरुत्वं त्वत्कुचयोरेव जागर्त्तीत्युक्तं किल भगवता वैणिकमुनिना केनचिदाप्तेन नाऽयं पन्था इति निवारितगमनो भवेदित्येतदपि न रुचिरं षट्कर्णो भिद्यते मन्त्र इत्यादिनीतिशास्त्रानभिज्ञं तं जनं जानाति किं भवती किञ्च । मन्मथाज्ञां लोके को वा व्यावर्तयितुं शक्तस्तथाहि

मृगा अपि सदारामानुरक्ताः पक्षिणोऽपि सुन्दरीसक्ताः ।।
गजा अपि कान्तारागानुसारिणो भृङ्गा अपि लताङ्गीकृतप्रणयाः।।७६।।

अस्त्वेतत् । जरासन्धादित्रासान्नागच्छेदिति वै तदप्यसंगतं यद्वित्रासे सुवृत्ते रत्ने तस्मिन् कुतो वा त्रासगन्धोऽपि । एतस्मिन्नन्तर एव शिशुपालाय रुक्मी मां दद्याच्चेत्कथमिति एतदपि गगनकुसुमसदृक्षं यतः श्रुतं मया मरालीमुखात्किल चैद्यप्रयाणसमये रथकेतुशिखरमूलेऽस्य केनचिद्दिवाभीतेन मङ्गलेतरशंसिनाक्रान्तमिति तदनलीकमिति प्रतिजानीते वामाक्षिस्पन्द इति विविध-चतुरालापैर्मालत्याश्वास्यमानां भैष्मीमाभाष्य विदितवेद्यां विधाय तन्नेत्रयोरासेचनकमात्मानमनयत् ।

प० -

चित्रं न किमिदं कृष्णाभिलाषक्लान्तचेतसः ।।
विप्रयोगोऽपि तन्वङ्ग्या बभूवानन्दकारणम् ।।७७।। इति ।

ग० - बलभद्रोऽपि कथमपि ज्ञातवृत्तान्तोऽरातिभयङ्करं चक्रमादाय सगदोऽपर इव कृष्णो गजादियुक्तं सैन्यमादाय सफलयन्निव रामत्वं तमनुससार सारसाक्षम् ।

प० -

ततः कृष्णमुखं सैन्यं यादवानां समागतम् ।।
राजकं तादृगेवासीज्जरासन्धपुरःसरम् ।।७८।।

जनाः सर्वेऽपि सामोदा बभूवुः सुमनस्तया ।।
माधवागमवेलायाङ्कितवं रुक्मिणं विना ।।७९।।

अत्रान्तरे

प० -

निजकरराजच्चक्रो गोकुलहृद्योऽब्जसुन्दरः सूर्यः ।।
स हि चरमाचलयोगं लेभे युक्तं हरेस्तस्य ।।८०।।

तदनु

उन्नृत्यन्नीलकण्ठेयं हंसानन्दापकारिणी ।।
सन्ध्याकालकलाशैली प्रावृड्लक्ष्म्याः समादधे ।।८१।।

अथ च ।

आशां त्यक्त्वा वसुमतस्तारानन्दवहस्तदा ।।
रागं तत्याज योगीव सोऽपि कालः शनैः शनैः ।।८२।।

अचिरादेव ।

श्यामा नीलम्बरोल्लासं दधाना मुक्तहंसका ।।
निशाभिसारिकेवागाच्छादिताब्जानना शनैः ।।८३।।

ग० - तस्मिन् व्यतिकरे जृम्भमाणतिमिरे निरुद्धचक्रवाककामसमरे कमलावलीवियोगदूनभ्रमरे सञ्जातनयनामये समये प्रविश्यैकाकी नगरं वृत्तान्तं ज्ञातवाँस्तत्र द्वे सख्यौ सँल्लपतः ।

प० -

भुजङ्गहृद्या तेऽपाङ्गश्रेणी वेणीव राजते ।।
तद्वच्छिलीमुखाकारा सापि ताराधिपानने ।।८४।। इति ।

काचन सहचरी कुपितां नायिकां सान्त्वयति ।

प० -

स्तन्युगमनङ्गरागोल्लसितं मा भून्मनः कुरु मृगाक्षि ।।
वेणीव भव गुणाढ्या मा भव परिवादिनी मुग्धे ।।८५।। इति ।

काचन वेश्या स्वसुतां शिक्षयति ।

प० -

आदौ द्रव्यं स्वीकुरु न गुणान्नो चेदभाववादोऽन्ते ।।
सामान्यानां पद्धतिरेषा मिथ्या न तार्किकान् पृच्छ ।।८६।। इति ।

कश्चिद्भटः प्राह ।

उग्रः स्वामी चण्डी तद्भार्या नन्दनः कुमारोऽयम् ।।
सेवकवर्गो द्रविणं कं वा याचेत वीरभद्रादिः ।।८७।। इति ।

कश्चित्कविः ।

कीर्तिर्देवीकृपया गुरुकुलवासात्सुकाव्यकरणाद्वा ।।
या साधिता मया तां दम्भेनैवाप दुष्कविव्रातः ।।८८।। इति ।

कश्चिद्द्रविणः प्राह ।

स हि निर्वेतनदासो विप्रो योऽस्पृश्यता भवेत्तस्याः ।।
यो दुर्गतस्तदीया भार्या बिसतन्तुसंयतमदेभा ।।८९।। इति ।

कश्चित्काञ्चित्स्त्रियमाह ।

सुरसिन्धुमज्जनमणिस्तम्भितकुसुमशरहुताशस्य ।।
उत्तेजिका किल त्वं तदुपरि मा कलय तादृशं स्नेहम् ।।९०।।

कृपणोऽयं शिशुपालो भैष्मीपरिणयनकालेऽपि ।।
किं मे दद्याद्वराकः करवलयाभ्यां करावलङ्कुर्यात् ।।९१।।

इतीतस्ततो गमनागमनेन कालं क्षिपयन्तीं निजवनितां सान्त्वयति कश्चिद्गणकयुवा ।

अयि मूढे क्व शिशुपालः क्व भैष्मी क्व तयोर्विवाहप्रसक्तिरपि श्रीमान् श्वः प्रभाते भर्तृदारिकामपहरिष्यति भवतीव मम चेतोवृत्तिं वीराग्रणीर्मधुमथनः । एतदङ्गीकृतमस्ति महिष्या राजा भीष्मकोऽपि मामाहूयोक्तवान् अयि विचूलभट्टकुमार वैचूलभट्ट जानासि खलु मदभिप्रायं यदि फलवान् भवेन्मदीयो मनोरथस्तर्हि तव साधनमस्ति हि तव कलत्रमानखशिखं रत्नाभरणैर्भूषयिष्यामीति अस्ति च गुरुबलयोगो वासुदेवस्य ।

प० -

तत्कृष्णभैष्म्योस्तन्वङ्गि योग्य एव समागमः ।।
स नीलवारिदाकारः सापि सज्जघनाकृतिः ।।९२।।

फलितं वक्ष्यामि ।

जन्मतारासुराचार्यवारसंयोगजं फलम् ।।
श्वस्तस्यैव ममाद्यात्र त्वत्प्रसादान्मृगेक्षणे ।।९३।। इति ।

ततश्च ।

पुष्करविशिखोल्लसितः सुमनोधर्मैकसुन्दरः सूर्यः ।।
प्रापोदयगिरिशिखरं कृष्णोऽपि च भीष्मकन्यकाचेतः ।।९४।।

ग० - अथ रुक्मी राजपुत्रोऽप्यबुधोऽतिक्रान्तगुरुश्च चैद्याय कनीयसीं दातुं कृतनिश्चयोऽम्बिकादर्शनार्थं तदेव वनमानीतवान् यत्र यादवसेनां च प्रतिपालयति रुक्मिणीं च कृष्णः । तथा हि । सा राजपुत्री नारायणबाहुचतुष्टयस्थिता वनमालेव भ्रातृचतुष्टयपरिवृता वेदचतुष्टयगूहितेव परब्रह्मशक्तिरङ्गचतुष्टयरञ्जितेव विजयलक्ष्मीः सञ्चारिणीव मदनराज्यसम्पद उशम्बकीव रतिदेव्याः नारायणीव जन्मान्तरं प्राप्ता कलशारोपणप्रक्रियेव विधातृसृष्टेर्वीचीपरम्परेव शृङ्गाररसमुद्रस्य पुनरुक्तिरिव सौभाग्यभार्गव्याः पेटीव गुणरत्नानां रसालताधिदेवतेव कञ्चुकिपरिवृता स्वर्गसाम्राज्यलक्ष्मीरिव विविधनिर्जरनारीश्लाघिता तीर्थयात्रेव शिशुपालदुरवापा सजीवेव मणिपुत्तलिका कुचभार-किञ्चिन्नम्रकलेवरारोपितज्येव कुसुमशरचापयष्टिः प्रापाम्बिकायतनं प्राप्य चानुल्लङ्घितविधिः विविधलताकुसुमादिपूजासाधनद्रव्यैः सम्पूज्याम्बिकाम् ।

प० -

त्वं नगतनया ह्यहमपि निर्जरपञ्चाननो हि तव कान्तः ॥
मामपि योजय पार्वति तव नाथसदृग्गुणेन कृष्णेन ॥९५॥

ग० - इत्यार्यास्तुतिं कृत्वा च निर्गत्य यावद्रथमारोढुमिच्छति परितः सञ्चारितनयना नयनातिथिर्बभूव मिलितराजकदम्बस्य । अथ तां दृष्ट्वा राजकमचिन्तयत् ।

प० -

वक्त्रे गुरुत्वं यदि ते वृत्तशास्त्रविदो विदुः ॥
कठिने कुचयुग्मेऽस्या वदतां किमु हीयते ॥९६॥

वेणीबन्धमहीनं कृष्णं नेत्रान्तमचलरूपं तम् ॥
कुचमस्याः स्वीकुर्वन् पुरुषो लीलां वहत्यये शम्भोः ॥९७॥

उरोजवच्चक्रमनोज्ञरूपा केशावलीव भ्रमराजिता च ॥
सङ्गीतवत्सत्पुटभेदहृद्या विद्येत नाभीसरसी मृगाक्ष्याः ॥९८॥

अलीकरूपो यदि मध्यभागः
पयोधराकारभृतश्च केशाः ॥
उत्सङ्गशोभाऽपि सरोरुहाक्ष्याः
करस्य शोभां कलयेन्न कस्मात् ॥९९॥

अस्त्वेतदन्यत्कथयामि चित्र-
रसाम्बुधौ मज्जति येन चेतः ॥
पयोधराभोगमवेक्ष्य तन्व्याः
सा राजहंसावलिराप तर्षम् ॥१००॥

अथ सापि कृष्णं वीक्ष्य ।

प० -

यस्य च रमा कलत्रं न वयःश्रीश्चारणाद्भुताकीर्तिः ॥
मा भूत्प्रतापसरणिः सोऽयं श्रीश्रीनिवासभूपालः ॥१०१॥

ग० - इति मनसि निश्चित्य सचमत्कारं कण्ठालङ्कारमादाय सखीकरे समर्प्य तद्व्याजेन

प० -

सद्वृत्तमेनं सुगुणं सुनायकं कथं कुचाभ्यां घटयामि साम्प्रतम् ।।
यन्नास्मि पाणिग्रहणक्षमाऽपि प्रभुः कठोरः सविता विघातुकः ।।१०२।।

ग० - इति प्रकाशं यावद्वदति तावदेव निभालयन्त्यां रुक्मिण्यां निरीक्ष्य दारुकं प्रति

प० -

घनवच्चापमनोज्ञं वनवद्बाणासनैकसौन्दर्यम् ।।
धर्मोल्लसद्गुणं सज्जनवद् भ्रूयुग्ममसिताक्ष्याः ।।१०३।।

किञ्चास्या भ्रूगुयलं धनुश्चेत्कन्यापि निकटे वसेत् ।।
अथवेयं कन्यापि न चेत्तदपि किं तुलां लगति चित्रम् ।।१०४।।

अपि चास्याः कुचयोर्मकरीगणश्चक्रशोभा सरसहितेति युक्तं यतोऽत्र सरो दृश्यते । अस्त्वेतत् ।

प० -

वहति हरिरूपसाम्यं तदपि यदि मध्यमं भवेत्तन्व्याः ।।
अङ्गं तदोत्तमं किं हंहो कविलोकपद्धतिर्वक्रा ।।१०५।।

गुरूल्लसन्त्यप्यगुरूल्लसन्ती
सहारहृद्यापि विहारहृद्या ।।
स्तनद्वयीयं सरसीरुहाक्ष्या
विचित्ररूपाप्यविचित्ररूपा ।।१०६।।

किं बहुना ।

प० -

इदं नेत्रद्वयं चास्या वक्त्रञ्च च कमलोज्ज्वलम् ।।
रमाभा मृगदृग्जीयात् पद्मरम्यमुखी चिरम् ।।१०७।।

ग० - भवतु यादृशी वा कुत एतत् भृङ्गाङ्गनाश्चन्दनानुलेपसुरभिं मां लक्षीकृत्यागत्य प्रतिनिवर्तन्ते किमपराद्धं मत्कण्ठस्थचम्पकमालया अथ यामिकवदेनां रक्षतो मदनस्य नीलेन्दीवरमयी बाणश्रेणी मयि पतन्ती साभिमार्ग उपसंहृता भवेत् ।

हन्त ज्ञातमिदानीम् ।

प० -

भजति न लज्जावशतस्त्यजति न मां दर्पकाङ्क्षया तन्व्याः ॥
सा मददृक्पातविधिः दृष्टिः शैलूषलीलया नटति ॥१०८॥

चित्रमेतत् ।

मञ्जुलास्ययुता रागवती सा तरुणीमणी ॥
प्रवीणापि च माकस्मान्मूर्च्छामालम्बते बत ॥१०९॥

ग० - इति वदन्नेव तथाकरोत् अथ राजपुत्रीमपश्यन्तः कन्यारक्षिणो भूभृत्कन्या कैलासे वर्तते पृच्छत कार्तान्तिकान् दर्शयन्ति वै ज्योतिःशास्त्रज्ञा इति जरद्धात्रीवर्गा अपहास्यतां नीतास्ततश्च मुक्तकञ्चुकं यः कालीयसर्पं कुचभारं च ममर्द यः समुज्जहार गजेन्द्रं गोपिकावसनानि च यस्य श्यामाभ्रमहिता देहकान्तिश्चर्या च तेन केनचित्पुरुषेण नीतेति कैश्चिदुक्ता अमितकोपा जरासन्धादयो भूपाः केचन करे केचन भुजयोः शक्तिं दधानाः केचिदर्जुना इव कर्णकठोरगर्जनाः केचन शिवा इवोग्राः केचन रामा इव केसरिजाताधिरूढाः सम्भृतसर्वाभिसाराः शूराः अहमहमिकया रुरुधुर्यादवबलम् । तदा तु

प० -

हलेन शतधा भिन्ना बलेन बलशालिना ॥
शरक्रीडासमारम्भे सा कालिन्दीव वाहिनी ॥११०॥

कन्यां जहार कृष्णः सप्रमदोऽभूद्धलायुधश्चित्रम् ॥
अतनुनियोधनलीलां तेनुः कृतवर्मसात्यकिप्रमुखाः ॥१११॥

बलमपि च भीममाजौ दृष्ट्वा रामं निषादियूथस्य ॥
अङ्कुशमगलद्धस्तात् कुशमक्ष्णोः शं तथैव मनसोऽपि ॥११२॥

विचित्रं विकलं चक्रे भूपवृन्दं हलायुधः ।।
तद्राजमण्डलं सोऽपि कृष्णपक्षो यतोऽभवत् ।।११३।।

चिराय युद्धं विविधं विधाय
क्रमेण जित्वा कतिचित्प्रवीरान् ।।
कण्ठे गृहीतोऽपि गदेन चित्रं
कलिङ्गराजो गतरुक् बभूव ।।११४।।

करालकोदण्डधरेण कृष्ण-
मंत्रिप्रबर्हेण निपीडितस्य ।।
शाल्वस्य चित्रं रणभूमिरासीद्-
अनुद्धवा सा खलु सोद्धवापि ।।११५।।

अङ्गेशानाक्रूरकावाजिसज्जा-
वन्योन्यं तौ धर्महीनौ तदानीम् ।।
चापाभावादादिमोऽथ द्वितीयोऽ-
प्यक्रूरत्वत्यागतश्चेति भेदः ।।११६।।

इत्थं प्रसेनेन विहन्यमानां
सेनां समालोक्य च कम्पमाने ।।
बार्हद्रथे संयतिनीरसेऽपि
भङ्गस्तदानीं कथमाविरासीत् ।।११७।।

वीराग्रणीः संयतियादवेन्द्रान्
निर्धूय सर्वान् कृतवर्मणोच्चैः ।।
धूतातपत्रोऽपि बभूव चित्रं
मुक्तातपत्रो दमघोषसूनुः ।।११८।।

केचिन्नृपाला बहुधारणाशां
हित्वा समाधिं सहसा ययुस्ते ।।

केचिच्च भग्ने नियमेऽपि युद्धे
यमप्रियत्वं न जहुः प्रवीराः ।।११९।।

मागधो राजहंसोऽपि न तेने सहसा रणम् ।।
तच्चित्रमथवा युक्तं स जराघटिताङ्गकः ।।१२०।।

वृष्णीनां मागधानां च भूपरागो महानभूत् ।।
आद्यानां हृदयेऽन्येषां वक्त्र एवेति तद्विदा ।।१२१।।

प्रायेण बुद्धिविकला मागधाः कृष्णविद्विषः ।।
अमित्रमण्डलं हित्वा विभिदुर्मित्रमण्डलम् ।।१२२।।

रामाभिधाना सा व्यक्तिर्गृहीत्वा मुशलं करे ।।
चकार न हि तच्चित्रं बहुधान्यस्य खण्डनम् ।।१२३।।

किं बहुना ।

कन्यां जहार कृष्णो विवाहशोभां जरासुतो लेभे ।।
चित्रं नन्दनसौख्यं प्रापुश्चेदीशमित्राणि ।।१२४।।

तदा वरामोदघना पुष्पवृष्टिर्यदुष्वभूत् ।।
न केवलं देवकृता वीणा मुनिकृतापि च ।।१२५।।

ग० - अथ विमुखे शिशुपालमण्डले मित्रमण्डले च गगनमध्यमधिरूढे कान्दिशीके जरासन्धादिराजके

प० -

रुक्मिण्यपि च रुक्मी च गुणजालेन संयतः ।।
कृष्णं सप्रमदं चक्रे गतमानोन्नतिस्तदा ।।१२६।।

ग० - ततश्च बलभद्रेण मोचितो रुक्मी लज्जया सह भोजकटं कृष्णोऽपि भैष्म्या सह द्वारकां कविरयं रत्नखेटोऽपि कीर्त्या तच्चरणरतिं प्रविश्य कृतार्थतामगमत् ।

प० -

तावुभौ श्लाघ्यसुरतौ श्यामौ सप्रमदोज्ज्वलौ ।।
श्रीरुक्मिणीवासुदेवौ रेजतुर्द्वारकापुरे ।।१२७।।

ग० - इति श्रीविश्वामित्रकुलजलधिकौस्तुभस्य सर्वतंत्रस्वतंत्रस्याद्वैतविद्याचार्यस्य दन्तिद्योतिदिवाप्रदीपबिरुदाङ्कितस्य साग्निचिति-विश्वजिद्याजिनः श्लेषयमकचक्रवर्त्तिनो लक्ष्मीधरसूनोश्चतुरधिकशतप्रबन्धनिर्मितिप्रथितपाण्डित्यस्य सत्यमङ्गलमहाग्रामवास्तव्यस्य रत्नखेट-दीक्षितस्य कृतिषु श्रीभैष्मीपरिणयचम्पूरियं सम्पूर्णतामगमत् ।।

प० -

विपश्चितामपश्चिमे विवादकेलिनिश्चिते
सपत्नजित्ययत्नमेव रत्नखेटदीक्षिते ।।
बृहस्पतिः क्व जल्पति प्रसर्पति क्व सर्पराट्
सन्मुखश्च षण्मुखश्चतुर्मुखश्च दिङ्मुखः ।।१२८।।

।। श्रीः श्रीशङ्करं वन्दे ।।

www.vallabhacharyakrupa.org

भाविनि काले प्रकाशयिष्यते

गङ्गावतरणचम्पूः (pdf)

(शङ्करदीक्षित-सूनु-बालकृष्णदीक्षित-कृता)

रुक्मिणीहरणचम्पू-कर्तृ-भारतमार्तण्ड-
पण्डितश्रीगट्टूलालाजी-महाराजः

Celebrating Samskrutam Celebrating Gattulalaji

अस्माकं संस्कृत-प्रकाशनानि

१. श्रीमन्महाप्रभूणां जन्मपत्रिका
२. महानुभावसद्रत्नमालिका
३. शिक्षामुक्तावली (श्रीजीवनजी-महाराज-विरचिता)
४. श्रीमत्प्रभुचरणानां जन्मपत्रिका
५. श्रीकृष्णचन्द्राष्टकम् (श्रीकेवलराम-विरचितम्)
६. अग्निहोत्रप्रयोगः (आपस्तम्बीयः)
७. विश्वप्रकाशानुक्रमणिका (श्रीविश्वनाथ-रचित-विश्वप्रकाशग्रन्थान्तर्गता)
८. श्रीगट्टुलालावर्यस्य लघुजीवनचरितम्
९. गीतगोविन्दार्थः (गोस्वामि-श्रीमद्विट्ठलनाथ-विरचितः) (अप्राप्यः)
१०. लघुस्तोत्रसरित्सागरः
११. The Mahamandir Sanskrit Series Vol. I (प्रहस्तवादः सविवृतिः)
१२. The Mahamandir Sanskrit Series Vol. II (पण्डितकरभिन्दिपालवादः)
१३. तैत्तिरीयशाखानुसारि - १) त्रिकालसन्ध्या २) ब्रह्मचारिणां होमः ३) ज्येष्ठाभिषेकः (सान्द्रमुद्रिका-सहिताः) (प्रकाशकः गीत-सङ्गीत-सागर-न्यासः)
१४. तैत्तिरीय-संहिता (का. ३, प्र. १-२) (सान्द्रमुद्रिका) (प्रकाशकः गीत-सङ्गीत-सागर-न्यासः)
१५. तैत्तिरीय-शाखायाः मूलग्रन्थाः (४ - MP3 सान्द्रमुद्रिका-सहिताः) (सहयोगि-संस्था : वेदप्रसारसमितिः)
१६. The Mahamandir Sanskrit Series Vol. III (माण्डूक्यदीपिका तथा कठोपनिषद्भाष्यम्)
१७. वेत्रस्य श्लोकाः
१८. बालकृष्णचम्प्वाख्यः प्रबन्धः (श्रीजीवनजी-महाराज-विरचितो नासिकनिवासिखाडिल्करोपनामात्माराम-(अपा)-शास्त्रि-प्रणीत-टीका-सहितः)
१९. भागवतपुस्तक-षोडशोपचार-पूजनविधिः (प्रकाशकः गीत-सङ्गीत-सागर-न्यासः)
२०. तैत्तिरीय - ब्रह्मयज्ञः (प्रकाशकः गीत-सङ्गीत-सागर-न्यासः)
२१. www.Vallabhacharyakrupa.org
✤ तं श्रीबालहरिं भजे । ✤ श्रीबालकृष्णचम्प्वाख्यः प्रबन्धः ✤ श्रीनृसिंहविजयमहानाटकम्
२२. www.Vallabhacharya-agrahara.org
On-line research base for advanced research in Sanskrit manuscripts pertaining to (i) Sahitya (ii) Champu (iii) Vaishnav Aagama (iv) Geeta Govinda (v) Neeti (Sanskrit Katha)

अस्माकं वैद्यकीय-प्रकाशने

१. बालक संरक्षण पर कुछ महत्त्वपूर्ण सलाह (डॉ. गिरीश सोनी B.H.M.S.)

२. Lessons From The Grand Rounds (For Office Practice)
Authors - Dr. Y. K. Amdekar & Associates.

अस्माकं लोकभोग्य-प्रकाशनानि

१. દિવ્યપ્રકાશ

२. સૂઆ(શુક)ની વાર્તા (संस्करणद्वयं - बालानां कृते ।)

३. ભક્તરત્નદ્વય (संस्करणद्वयं - बालानां कृते ।)

४. હરિ કો ભજૈ સો હરિ કો હોય (संस्करणद्वयं - बालानां कृते ।)

५. શ્રીયમુનાજીનાં નવાખ્યાન

६. तुलसीमालाधारणवादः (श्रीपुरुषोत्तमजी-कृतः व्रजभाषा-गुर्जरभाषाटीका-समेतः ।)

७. श्रीगोकुलाधीशजी के २५ वचनामृत (संस्करणद्वयं व्रजभाषायाम् ।)

८. શ્રીભટ્ટજી મહારાજશ્રીનાં ૩૨ વચનામૃત

९. पुष्टिकलादर्शन - स्मारिका (गीत-सङ्गीत-सागर-न्यासः)

१०. Vallabhadigvijaya - An interactive animated CD-Rom on the life of Mahaprabhu Shrimad Vallabhacharya

११. कृष्णरसामृत - अष्टछाप संगीत CD (गीत-सङ्गीत-सागर-न्यासः)

१२. नादरस (गीत-सङ्गीत-सागर-न्यासः)

१३. શ્રીનાથજી સુહામણા

१४. www.Vallabhacharyakrupa.org

✤ મંગલવાદ્યમ્ - માદલની વધાઈ (જન્માષ્ટમી)
✤ Beautiful Birds from Vrajbhoomi (a photographic study)
✤ Nathadwara School of Art
✤ શ્રીનાથજી સુહામણા
✤ उत्सव निर्णय (व्रजभाषा)
✤ Feathered Friends From Vraj
✤ Vraj Darshan
✤ Taalchakram (E-tuitions for the Pakhawaj)
✤ Shri Balakrishna On-line Pathashala
(पूर्वाचार्याणां दुर्लभ-व्रजभाषा-प्रवचनानि।)

Our humble efforts as per the Holy Writ for empowerment of individuals through education and community development.

i) Vallabha Matha Scholarship

ii) Shrimad Vallabhacharya Jayanti Award (2014)

iii) Shri Vallabhacharya Krupa Prasadah

iv) Shri Vallabhacharya Krupa Pratapah

संस्कृतोत्सव-शृङ्खला (Celebrating Samskrutam Series)

१. भैष्मीपरिणयचम्पूः (pdf)

२. गङ्गावतरणचम्पूः (pdf) धारावाहिनी